# GangAShTakam | by Sage Valmiki

# ગઙ્ગાષ્ટકં શ્રીવાલ્મિકિવિરચિતમ્

## Document Information

Text title : ga.ngAShTakam

File name : gangAShTakamValmiki.itx

Category : aShTaka, devii, nadI, vAlmIki, devI

Location : doc_devii

Author : Sage Valmiki

Transliterated by : N.Balasubramanian bbalu at sify.com

Proofread by : N.Balasubramanian bbalu at sify.com

Latest update : August 10, 2007

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# ગઙ્ગાષ્ટકં શ્રીવાલ્મિકિવિરચિતમ્

માતઃ શૈલસુતા-સપત્નિ વસુધા-શૃઙ્ગારહારાવલિ
સ્વર્ગારોહણ-વૈજયન્તિ ભવતીં ભાગીરથીં પ્રાર્થયે ।
ત્વત્તીરે વસતઃ ત્વદંબુ પિબતસ્ત્વદ્વીચિષુ પ્રેઙ્ખતઃ
ત્વન્નામ સ્મરતસ્ત્વદર્પિતદૃશઃ સ્યાન્મે શરીરવ્યયઃ ॥ ૧॥

ત્વત્તીરે તરુકોટરાન્તરગતો ગઙ્ગે વિહઙ્ગો પરં
ત્વન્નીરે નરકાન્તકારિણિ વરં મત્સ્યોઽથવા કચ્છપઃ ।
નૈવાન્યત્ર મદાન્ધસિન્ધુરઘટાસંઘટ્ટઘણ્ટારણ-
ત્કારસ્તત્ર સમસ્તવૈરિવનિતા-લબ્ધસ્તુતિર્ભૂપતિઃ ॥ ૨॥

ઉક્ષા પક્ષી તુરગ ઉરગઃ કોઽપિ વા વારણો વાઽ-
વારીણઃ સ્યાં જનન-મરણ-ક્લેશદુઃખાસહિષ્ણુઃ ।
ન ત્વન્યત્ર પ્રવિરલ-રણત્કિઙ્કિણી-ક્વાણમિત્રં
વારસ્ત્રીભિશ્ચમરમરુતા વીજિતો ભૂમિપાલઃ ॥ ૩॥

કાકૈર્નિષ્કુષિતં શ્વભિઃ કવલિતં ગોમાયુભિર્લુણ્ટિતં
સ્રોતોભિશ્ચલિતં તટામ્બુ-લુલિતં વીચીભિરાન્દોલિતમ્ ।
દિવ્યસ્ત્રી-કર-ચારુચામર-મરુત્સંવીજ્યમાનઃ કદા
દ્રક્ષ્યેઽહં પરમેશ્વરિ ત્રિપથગે ભાગીરથી સ્વં વપુઃ ॥ ૪॥

અભિનવ-બિસવલ્લી-પાદપદ્મસ્ય વિષ્ણોઃ
મદન-મથન-મૌલેર્માલતી-પુષ્પમાલા ।
જયતિ જયપતાકા કાપ્યસૌ મોક્ષલક્ષ્મ્યાઃ
ક્ષપિત-કલિકલઙ્કા જાહ્નવી નઃ પુનાતુ ॥ ૫॥

એતત્તાલ-તમાલ-સાલ-સરલવ્યાલોલ-વલ્લીલતા-
ચ્છત્રં સૂર્યકર-પ્રતાપરહિતં શઙ્ખેન્દુ-કુન્દોજ્જ્વલમ્ ।
ગન્ધર્વામર-સિદ્ધ-કિન્નરવધૂ-તુઙ્ગસ્તનાસ્ફાલિતં
સ્નાનાય પ્રતિવાસરં ભવતુ મે ગાઙ્ગં જલં નિર્મલમ્ ॥ ૬॥

ગાઙ્ગં વારિ મનોહારિ મુરારિ-ચરણચ્યુતમ્ ।
ત્રિપુરારિ-શિરશ્ચારિ પાપહારિ પુનાતુ મામ્ ॥ ૭॥

પાપાપહારિ દુરિતારિ તરઙ્ગધારિ
શૈલપ્રચારિ ગિરિરાજ-ગુહાવિદારિ ।
ઝઙ્કારકારિ હરિપાદ-રજોપહારિ
ગાઙ્ગં પુનાતુ સતતં શુભકારિ વારિ ॥ ૮॥

ગઙ્ગાષ્ટકં પઠતિ યઃ પ્રયતઃ પ્રભાતે
વાલ્મીકિના વિરચિતં શુભદં મનુષ્યઃ ।
પ્રક્ષાલ્ય ગાત્ર-કલિકલ્મષ-પઙ્ક-માશુ
મોક્ષં લભેત્ પતતિ નૈવ નરો ભવાબ્ધૌ ॥ ૯॥

॥ ઇતિ વાલ્મીકિવિરચિતં ગઙ્ગાષ્ટકં સમ્પૂર્ણમ્ ॥

Encoded and proofread by N.Balasubramanian bbalu@sify.com

*GangAShTakam | by Sage Valmiki*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*